Atri, author of *Jaya Stambha praśāsti*, 36.
Aurangābad, 13.
Azam Humayun, 23.
Āzam Khan, 10.

Baggularāja, 10, 11, 15.
{Baglan
{Bāglān, 11, 14.
{Bāgula,
{Baggula, 11, 14.
Bagumra, 7 n.
Baharji, 11.
Bayley, author of the '*History of Gujarat*', 27.
Bamboda, 18.
Baippa Nayaka, 12.
Bāna Māta, temple of, 21.
Bāpā Rāval (Bāpā), 22, 37.
Baroda, 24.
Basantgarh, 18.
Beḍura, 11.
Beḍura-Bhūpāla, also Boddhura-bhūpāla, 10, 11.
Belur, 11.
Bellur, 12, 14.
Berar, 14.
Bhairavasena, 11.
Bhana, 22 n.
Bharata, author of '*Nātyaśastra*' 2, 35
{Bhaṛatakośa
{Bharatakośa, 2, 5 n.
Bhāskarācarya, 7.
Bhāskaravaṁśa, 8.
Bhavanagar-inscriptions of, 34, 34 n.
Bhavāni, 11.

Bhillama, 7 n. 8.
Bhoja, 35, 36.
Bhula, 18, 33.
Bikaner, 20.
Brahmagiri, 12, 14.
Brahmādrijātā, 12.
Briggs, 22, 31.
Broach, 14.
Bombay, 13, 14, 30.
Bujārakhāna, 10.
Bundi, 18, 20, 21.

Caṇḍī-S'ataka, 35, 35 n.
Chāchā, 16, 17, 37
{Champaner
{Champanere, 23, 27.
Chandor, 13.
Chatsu (Chaksu), 20.
Chhoti Khatu, 20.
Chitod, 24, 29, 34.
Chitor, 16, 17, 19, 20, 21, 22, 24 n, 26, 27, 28, 30, 31 n, 33, 35.
{Chittodgadh, 29.
{Chitrakūṭa (Chitod)
Citrakūṭa 28, 29 n. 43
Chavarli, 18.
Chonda, of Mandor, 18, 19, 29
Chonda, 20.
Chonda, Rathod, 24, 25.
Commissariat, 23 n, 24 n, 31.

Dabboi, 24.
Dafar Khan, 24.
Dalal, C.D., 11.
Damanpura, 14.
Damman, 14.
Daultabad, 11, 15.
Delhi, 11, 20, 21, 23, 24, n, 25.
Delvāḍa, 29.
Depāka, 34.
Devagiri, the Yādavas of, 8, 14 n, 15.
Devarāya I, 9 n.
Devarāya II, 9.
Dhoyi, 35.
Didwana, 25.
Dīpsingh, 21.
Doḍiyā Narsingh, 14.
Dungerpur, 14.

Ekalingji, temple and inscription of, 22, 33, 36.
Ekalinga Purāṇa, 37.
Ekka, son of chāchā, 17.
Ere Krishnappa Nayak, founded the Bellur family of South, 11, 12.

Farhat Mulk, 23.
Fath Khan (Fatah Khan), 10.
Fathpur, 31.
Fateh Wadi, 31.
Fergusson, James, 29, 31, 31 n, 32 n, 34, 34 n.
Ferishta (Ferista), 15, 21, 21 n, 22, 26, 26 n, 27, 27 n, 30.
Firuz, heir-apparent of Mohammed Tughluq, 25

Gagaran, in Kota, 20.
Gagaroon, 16 n.
Gahlots, 30 n.
Gajadhar Singh, 22.
Gālnā, fort of, 15.
Gaṇadevi, 13.
Ghanadevi, 13.
Giripura Dungara, 14.
Gītagovinda, of *Jaideva*, 34,35.
Gītaratnakoṣa or G taratnakos'a 1, 43
Godāvarī, a river, 12, 13, 14.
Gopacandra, Gopacandra Bāgula 11, 15
Gaurishanker ojha, oza, ojhaji, 23, 24, 32 n.
Govana I, 7.
Govana II, 7.
Govana III, 7.

Govindarāja, 7.
Govinda, 36.
Guhelot, 22.
Gurjara, 14.
Gujrat, Gujarat, 14, 17, 20, 22, 23, 23, n. 24, 25 n, 26, 27, 28, 31, 36, 37.

Hallar, district of, 19.
Hamir-Rāṇā, 33, 37.
{Hamsābai
{Hansābai, sister of Chonda, 19, 20 n.
Haras, a family, 18.
{Haravati,
{Hārāvati, 21.
Harbilās Sārdā, 23, 35.
Hari Rai, 23.
Har Raj, 18.
Harṣa, 35.
Hasan Malik, 10.
Hassan, a district, 11.
Hemadideva, 7, 8.
Heras, H, 10 n, 12 n.
{Hindu Sultan,
{Hindu Suratrāṇa, a title earned by Kumbhā, 21.
Hoyasalas, a royal family, 11.
Humayun Shah, 23.
Hushang, of Malwa, 23.

Idar, 22, 23.
Igatpuri, 13.
Imad-ul-Mulk, 26.
Immaḍi-Devarāya, 9, 10.
Indrarāja, 7, 14.
Indrasenarāja, 8.

Jafar Khan, of Gujarat, 22.
Jahangir, his Memoirs, 30.
Jaisingh, of Amber, 22 n.
Jaitmal, 17.
Jaitrakarṇa, of Idar, 22.
aitrapāla, 7 n, 8.
Jaitra, architect of the *Jaya-stambha*, 32.
Jasamāmbikā, mother of Kālasena, 7, 14.
Jaya, 32 n.
Jəyastambha 17, 28, 29, 31 31 n, 32, 33, 34, 35, 36.
Jaya-stambha-pras'asti, 37.
Jemal-Rao, 22 n, 23.
Jheelwara, 16.
Jija, a Jain Community, 29.
{Jodhā
{Jodha, 19, 20.
Jodhpur, 24 n.
Jogidas Ambalal Joshi, 22 n.

Kāhuni, a village, 20.
Kailwara, a village, 21.
Kambhoi, battle of, 23.
Kaitān Rāṇi, 29.
Kālajit, 6.
Kalānidhi, of *Kallināṭha*, 5, 8, 9, 36.
Kālasena, 2, 3, 4, 5, 6, 8, 11, 12, 13, 14, 15, 33.
Kallinātha, 5, 9, 10, 10n.
Kālasena, 3, 3 n, 4, 5, 6, 10.
Kalacuris, the emblem of, 14 n.
Kālu-ā-deva, 15.
Kālujī, 5, 6.
Kalyāṇa, 13.
Kalyāṇapura, 13.
Kanha, son of Mohil, 18.
Kānḍhal, 19.
Karmāvati Laṣumā (or Lakhumā), chief queen of Kālasena, 7, 14.
{Karnātak
{Karṇāṭaka, 8 n, 12, 34.
Kannad, 35.
Kes'ava Jhoting 32.
Khāna, 10.
Khaljipur, 21.

{Khandesh
{Khānadesh, 7 n, 8 n, 11, 14.
Khan Khānā, 31.
Khatgarh, 18.
Khatu, 20.
Kheta, 23.
Khetsingh, 16.
Khizir Khan, 25.
Khuchi, 16.
Kirtistambha, a Jain pillar, 12, 22, 24, 29, 33.
Kondommā, 12.
Konkan, 11, 13.
{Kootb Shah
{Kootab Shah
{Kutub Shah, 26, 27.
Krishṇā, 13.
Krishna Deva Raya, 12.
Kṛṣṇarāja I, 7.
Kṛṣṇarāja II, 7.
{Kshetra
{Kshetrasingha or Kheta, 22, 23, 24.
Kshemakaran, 16 n.
Kumārapāla, 36.
Kumbhakaran, 16 n, 32 n.
Kumbhalgarh, 21, 26, 33.
Kumbha, 3,4,5,15,15n,16,17,20, 21, 22, 24 n, 25, 26, 28, 30 n, 31, 33, 34, 35, 36, 37, 43.
Kumbhā-Rāṇā, 18, 19, 20, 20 n, 21, 25, 26, 27, 28, 29, 30, 33, 34, 35, 36, 37, 37 n.
Kumbhabhūbhujā, 4.
Kumbhakarṇa, 2, 3, 3n, 4, 5, 8, 9, 15, 16, 34, 35.
Kumbhaldevī, 37 n.
Kumbhasambhava, 4
{Kumbhalgaḍha
{Kumbhalagaḍha, 24, 28.
Kumbhala-meru, 28, 36.
Kumbhaṇ a, 4.
Kumbhasvāmi, 4, 33.
Kumbho, 15.
Kunhan Rājā, Dr C, 1, 2, 5.
Kutb-Minar, 31.
Kutub-bu-din-Mubarak, 23.

{Lākhā
{Lakha, Maharānā, 18, 19, 37.
Laghumādevi, chief queen of Kālasena, 7 n, 8.
Lākhā, of Sirohi, 18.
Lakṣmī, 29.
Lalbai, daughter of Mokal, 16n.

Madangad, 13.
Madanpura, 13
Madaria, 16.
Maheśa, 32, 36.
Mahipa, 16, 17.
{Mahmmad
{Mahmud, of Gujarat, 10, 30.
Mahmud, of Malwa, 21, 22, 30.
Mahmud Khalji I, of Malwa, 17 21, 27, 30.
Mahmud, 21,22,24 n, 30,31,31 n.
Mahmud I Begda, 10, 11.
Mahmud I, 30, 30 n.
Mahmud II, 10, 30 n.
Mahmud III, 10.
{Mahmud Khalji
{Mahmud Khilji, 27, 28, 31.
Mahoragpura, 14.
{Māira,
{Mairā 16, 17, 37.
Malegaon, 15.
Malik Wagi, 15.
Malik Ashraf, 15.
Malik Dinar, 23n.
Malik Gaddai, 26.
Malik Shaaban-Imad-ul-Mulk, 26.
Mallika, 10.
Mallikārjuna, 9, 10.
Malik-ut-Tujjar, 11.

Malwa, 17, 19, 20, 21, 22, 23, 26, 27, 30 n, 36, 37.
{Māmadeva
Māmdeva-temple of, 33, 36.}
Mandal, 23.
{Mandu
Maṇdu
Mandoo, 17, 21, 22, 30.}
Maṇḍana, 28, 36.
Mandelslo, 31.
{Mandalgarh
Mandalagadha
Mandalagara, 18, 20, 21}
{Mandor,
Mandawar
Mandovar, 17, 18, 19, 20, 20n.}
Mandu, 19.
Mandsaur, 17.
Mangesh Ramkrishna Telang, 9.
Manira (Manīra-Vira), 11.
Mayūragiri, 11.
Mehta Nainsi, his *Khyat*, 25.
Mewar, 16, 17, 18, 19, 20, 21, 22, 23, 24, 25, 27, 28, 33, 36.
Mhāmarāja (Hmāṅga), 6.
Mirā, 25.
Miran, 11.
Miran Ādilkhan, 11.
Miran Mubarik, 11.
Mirat-i-Sikandari, 18, 27.
Minara-e-Haft-Manzari, 30.
Modasa, 23.
{Mokal
Mokalev, *Maharana*, 16, 18, 19, 22, 24, 24 n. 25, 36, 37.}
Mohil, 18.
Mohammada, 10.
Mṛgāṇka-Tāmarāja, 14.
Muhammad I, 10.
Muhammad II, 10, 11.
Muhammad III, 10, *Sultans of Gujarat*.
Mahmud Shah, son of Firuz, 25.
Muhammad Tughlak, 11, 23, 24.
Mujahid Khan, 26.
Multan, 25.
Muṇja, 36.
Muzaffar Khan, 23.
Muzaffar Shah, 25, 25 n.
Muzaffar III, 31.
Mysore, 11.

{**N**agour
Nagour
Nagoor 16,22,24,24n, 25, 25 n, 26,28,20.}

Nagpur,. 14
Nandlal De, 13.
Nandol, 23.
Nāpā, 32.
Narahari, 32.
{Narānaka
Narana, in Jaipur, 20.}
Narnāla, a hill fort, 14.
Narandas, 22 n, 23.
Narsingh, 18.
Narmada, in Gujrat, 14.
Nasik, 5, 13, 14, 15.
Nasirkhāna, 10.
Nāthā, his *Vāstumanjarī*, 36.
Nathsingh, 16 n.
Navasari, 13.
Nikumbh-vaṁs'a, 7, 8, 14, 15.
Nilakanta Sastri, K.A., 9, 10.
Nṛtyaratna-kos'a, 1, 2, 3, 4, 5, 6, 8, 9, 10.
Nṛtyas'āstra, 2.
Nātyas'āstra, of Bharata, 2, 34.
Nuniz, 9n.

Orissa, 15.

Padmāvatī, 6.
Padshah Ahmed, founded Ahmedabad, 24.

Pai hills, 17.
Pai Kotra, 16.
Pañcavatī, 13.
Paramāra, 16

Parmārs, 29.
Pāṭaḍi, 13.
Paṭali, 13.
Pāṭhyaratnakos'a, 1, 2, 3 n, 4, 6, 10, 13, 35.
Pattana, same as Anahilwar Patan, 24.
Peṅkarāja (Peḍa), 6.
Percy Brown, author of '*Indian Architecture*', 29 n, 31 n.
Pindarvāṭaka, 33.
Pratāparudra, 15.
Prithviraj Chauhan, 24.
Prithvivallabha, 7 n.
{Punjaji
Punja
Punjā, 22 n, 23, 32.
Puntamba, 14.
Puṇyastambha, 14.

Qutub, 26.
Qutub-ud-din, of Gujarat, 27, 28.

Rāghava, 37.
Rāghavadeva, 19, 20.
Rai Ramchandar, 26.
Rajamundry, 10.
Rājapolas, 29.
Rājā, 17.
Rajdhar, 16 n.
Rāma, 29.
Rāma Amātya, 9 n.
Rāmachandrarāya, 9 n.
Ramakrishna Kavi, 2, 5n.
Rāmarāja, 6.
Rātākot, 16.
Ratanākara, 34.
Ratnakos'as, 1, 4.
Rūnkot, 17.
Rūpavatāra, 36.
Ranapura, 34.
Ranakpur, a temple, 18, 20, 33.
Rāṅdel, 13.
Rander, a town, 14.
Raningadeo, 25.
Rānipura, 14.
{Ranmal
Raṇamalla, 17, 18, 19, 20, 22, 24, 25, 37.
Rasik-priyā, 27, 34, 35, 37 n.
{Rāṣṭrauḍhavaṁs'a Mahākāvya
Rāṣṭrauḍha-Vaṇṣa-Mahākāvya. 11, 15.
Rasaratnakos'a, 1.

Sabdakalpadruma, 12.
Sādala, 24.
Sādari, 33.
Sādhu, 25.
Sahāran (Sādhāran), 25, 25n.
Sahas Mal, of Sirohi, 18.
Salera, 33.
{Saṁgītamīmāṁsā
Saṃgītamīṃāṁsā, 1, 2, 5, 8, 35.
{Saṁgītarāja
Sangītarāja
Saṃgītarāja, 1,2, 3n, 4, 5, 5n, 8, 43, 44n,
Saṁgītaratnākara of S'arngadeva, 2, 5, 8, 9
Sanghapati Dharanāka, 34.
Samiddhevs'ara Mahādeva, a temple, 25.
Samprati, a Jain king, 28.
Saṅgamaner, 14.
Saṅgamanīra, 14.
{Sanjñā
Sajñāpura, 13.
S'ankara, 36.
Sangram, of Mewar, 22n
Sangrām Singh, 30 n.
S'antinātha, 33.
Sanwaldas, 22, 22n.
{S'arṅgadeva
S'ārṅgadeva, author of *Saṁgitaratnākara*, 2, 5, 8

Sarangpur, in *Malwa*, 20.
Sarda, Har Bilas, 25n 26n, 27, 28.
Sarkhej 'Fateh Bagh', 31.
Sātala, 24.
Satta, 16n.
Saubhāgyadevī, 17n.
Sayyad Mohammad, 20.
S'ekhara, 36.
Sema, a village, 33.
Seringapatan, 11.
Seth Kasturbhai Lalbhai, of Ahmedabad, 34 n.
Sewell, 9.
Shah Guṇaraj, 33.
Shalji, 18.
{ Shamskhan
{ Shumskhan, 25, 25n, 26.
Shiva, 16 n.
Shringirishi—Inscription of, 24.
Sikri 'Fathabad', 31.
Silāhāras, 14.
Siṅghana, 7n, 8.
{ Sirohi
{ Sirohy, 18, 21, 27, 26, 20.
S'irpur, 13.
Sisodia of Mewar, 19, 20.
Sohanadeva of Nikumbhavaṁsā, 7.
Sonargaon, 23, 24.
Sooltan Hooshang, 30.
Sooltan Mahmud, 30.
Somasundara Sūri, 34.
Sopārā, 14.
S'ridevi, 7.
S'rīpura, 13.
S'ṛngiṛs'i, Inscription of 16.
Sthāna, 11.
Sūḍa-prabandha, 34.
S'uklapura, 14.
Sultan Ala-ud-din, 23n.
Sultan Muhammad Tughluq, 25.
Sultan Qutb-ud-din, 26.
Surat, a district, 13.
Suvarṇadurga, 13.
Suvarna Garuḍa-dhvaja, 14.
Suvarṇarṣabha-dhvaja 14n.
Suvarṇa-Vyāghra, 14.
Svara-Melakalānidhi, 9n.

Tajkhan, 21,26.
{ Tāmarājendra (Tāmarāja), 6.
{ Tāmarāji (Tāmaraja), 6.
Tānā, 25.
Tank Rajputs, 25.
Tārā, 29.
Tārāpura, 13.
Tātārakhāna, 10.
Telingānā, 10.
Thalner, 11.
Thana, 13.
Thana, a fort, 13.
Timur 24n, 25.
Tod, Col. James, 28, 31, 32.
Toḍā, 24.
Toṇḍanur, 11.
Toṇṇur, 11.
Trajan, in Rome, 31.
Tringalawāḍī, 13.
Trisandhyā, 12.
Trisandhyakṣetra, 12.
{ Triyambaka
{ Tryambak
{ Tryambaka, 5, 12, 13, 14.
Tryambakes'wara. 12.
Tughluq dynasty, 24n.
Tujārakhāna, 10, 11n.
Tujāraṣāna. 10.

Udaysingha, 36, 37.
Uddhāra-dhoraṇī, 36.

Vādyaratnakos'a, 1.
Vasai (Bassain). 14.
Vasantpur, 33.
Vāstumanjarī, 36.

Vāstu-Sāra, 36.
Vāstus'astra, 21, 36.
Vāṭikācala, 13.
Velāpura, 11.
Vijaya, father of *Prauḍha Devarāya*, 9.
Vijayanagar, 9; 12.
Vijay Rāya I, 9n.
Vincent Smith, 31, 32.
Vigatpuri, 13n.
Vikaṭapuri, 13n.
Viramdeva, 16n.
Vira Ballāla III, 11.
Vir Vinod, 16.
Vyāghra-Cāmīkara, a dynasty, 6, 14.

Wajih-ul-Mulk, 25.
Wolsely Haig, 24n. 29, 30n. 31.

Yādavas, 14, 15.
Yuga-S'rī-Chaturmukha, also called *Trailokyadīpaka*, 34.
Yuzbashis, 24.

Zafar, 23
Zafar Khan, 23, 23n, 24, 25, 25n.
'Zyreitbag', Jitbag, 31.

मेदपाटदेशाधीश्वर-श्रीकुम्भकर्णनृपति-विरचितः

नृत्यरत्नकोशः।

तृतीयोल्लासे प्रथमं परीक्षणम्।

[मङ्गलम्।]

यस्मिन् समस्तकरणानि न कारणानि
योऽनङ्गहारविजयी च नवाङ्गहारः।
यश्चाङ्गहाररुचिरामलनृत्यकारी
नारीकृतार्धतनुमीशमहं नुवे तम्॥ १
करणान्यथ वक्ष्यन्ते नृत्यस्य करणानि वै।
शुद्धानि भरतोक्तानि वसुखेन्दु[1] १०८ मितानि च॥ २
करपादाद्यङ्गकस्य क्रिया रसनिरन्तरा।
सविलासानुकरणं नृत्यादि[2] करणं तु तत्।
अथोद्देशं[3] वदे तेषां लक्षणं च सविस्तरम्॥ ३

*

[शुद्धकरणानि।]

तलपुष्पपुटं लीनं वर्तितं वलितोरु च।
मण्डलस्वस्तिकं वक्षःस्वस्तिकं स्वस्तिकं ततः[4]॥ ४
आक्षिप्तरेचितं पृष्ठस्वस्तिकं चार्धपूर्वकम्।
स्वस्तिकं दिक्स्वस्तिकं चोन्मत्तं[5] समनखं ततः॥ ५
अपविद्धं सञ्चितं च तथा स्वस्तिकरेचितम्।
निकुट्टमर्धनिकुट्टं कटिच्छिन्नं कटीसमम्॥ ६
विक्षिप्ताक्षिप्तकं नाम भुजङ्गत्रासितं तथा।
अलातं निकुञ्चितं च घूर्णितं चार्धरेचितम्॥ ७
ऊर्ध्वजान्वर्धमत्तल्लि स्याद्रेचकनिकुट्टितम्।
मत्तल्लि ललितं चैव वलितं दण्डपक्षकम्॥ ८

1 AB put १०८ after वसु। 2 AB °त्याद°। 3 C °द्देशवदे°। 4 B मतः।
5 AB उन्नतं।

नूपुरं पादापविद्धं भुजङ्गत्रस्तरेचितम् ।
[भुजङ्गाञ्चितछिन्ने च भ्रमरं दण्डरेचितम् ।]
चतुरं च कटिभ्रान्तं व्यंसितं क्रान्तमित्यपि ॥ ९
वैशाखरेचितं पार्श्वनिकुट्टं चक्रमण्डलम् ।
वृश्चिकं लतावृश्चिकं तथा वृश्चिककुट्टितम् ॥ १०
अथाक्षिप्तं चार्गलं च तथा वृश्चिकरेचितम् ।
उरोमण्डलमावर्तं तथा तलविलासितम् ॥ ११
ललाटतिलकं दोलपादकं कुञ्चितं तथा ।
विवृत्तं विनिवृत्तं च पार्श्वक्रान्तं निशुम्भितम् ॥ १२
विद्युद्भ्रान्तमतिक्रान्तं विक्षिप्तं च विवर्तितम् ।
गजक्रीडितकं[1] गण्डसूचि स्याद्गरुडप्लुतम् ॥ १३
तलसंस्फोटितं पार्श्वजानु गृध्रावलीनकम् ।
सूचीविद्धं सूचि चार्धसूची स्याद्धरिणप्लुतम् ॥ १४
परिवृत्तं दण्डपादं मयूरललितं ततः[2] ।
प्रेङ्खोलितं सन्नतं च सर्पितं [3]करिहस्तकम् ॥ १५
प्रसर्पितमपक्रान्तं नितम्बं स्खलितं ततः ।
सिंहविक्रीडितं सिंहाकर्षितं चावहित्थकम् ॥ १६
निवेशमेलकाक्रीडमुद्वृत्तं जनितं तथा ।
तलसंघट्टितं विष्णुक्रान्तं चोपसृतं तथा ॥ १७
लोलितं मदस्खलितं वृषभक्रीडितं ततः ।
संभ्रान्तमुद्धाटितं च विष्कुम्भं[4] शकटास्यकम् ॥ १८
ऊरूवृत्ताभिधं चैव नागापसर्पितं तथा ।
गङ्गावतरणं चेत्थमष्टोत्तरमुदीरितम् ॥ १९
करणानां शतं पूर्णमङ्गहारोपयोगिकम् ।
अन्यानि सन्ति भूयांसि गतिस्थित्यादियोगतः ॥ २०
अङ्गानां मेलके तानि स्वयमूह्यानि पण्डितैः ।
प्रायेण व(?न)र्तनारम्भे समौ पादौ लताकरौ ॥ २१
चातुरस्रं शरीरे च विशे[षो]ऽस्थो यथास्थितः ।

*

चारीमध्यर्धिकामेते दक्षिणे चरणेऽग्रगे ॥ २२

---

1 AB °क्रीडनकम् । 2 C तथा । 3 AB करह° । 4 A. Nāṭyaśāstra and other works such as S. R. give Viṣkambha; but Monier Williams on the authority of Vopadeva gives विष्कुम्भ. also.

व्यावृत्त्य दक्षिणं पार्श्वमागते करयोर्युगे ।
परिवर्तनतो वामं पार्श्वं सन्नतमाश्रिते ॥ २३
कुचक्षेत्रं श्रितो यत्र हस्तः पुष्पपुटो भवेत् ।
तलपुष्पपुटं तत् स्यात् पादेऽग्रतलसञ्चरे ॥ २४
रङ्गे पुष्पाञ्जलिक्षेपे लज्जिते योषितामपि ।
यदान्यकरणादेतदनु स्यात् करणं तदा ।
एतत् करक्रियां त्यक्त्वा ग्राह्या तत् करणानुगा ॥ २५
॥ इति तलपुष्पपुटम् ॥ १ ॥

*

ग्रीवानतांसकूटं च भवेद्यत्र निहञ्चितम् ।
ऊर्ध्वमण्डलिनौ हस्तौ विधाय हृदयेऽञ्जलिः ।
यत्र तत्करणं लीनं वल्लभाभ्यर्थने स्मृतम् ॥ २६
॥ इति लीनम् ॥ २ ॥

*

हृदयाभिमुखौ हस्तावाश्लिष्टमणिबन्धकौ ।
समं स्वस्तिकतां नीतौ व्यावृत्तपरिवर्तितौ ॥ २७
उत्तानौ पातयेदूर्वोर्यत्र तद्वर्तितं मतम् ।
पताकौ पातयेत्तौ हि यत्रासूया प्रयुज्यते ॥ २८
क्रोधेऽधोवदनौ स्यातां निघृष्टौ तौ तथाविधौ ।
विनियोगवशादन्ये शुकतुण्डादिका इह ॥ २९
॥ इति वर्तितम् ॥ ३ ॥

*

व्यावृत्तिपरिवृत्तिभ्यां समं वक्षसि चेत् करौ ।
कृत्वाक्षिप्तिकया चार्यां परिवर्त्य च संहतौ ॥ ३०
[1]वक्षो नीत्वा निधीयेते शुकतुण्डावधोमुखौ ।
एवं कृत्वा ततश्चारीं बद्धां कृत्वा स्थितिर्यदा ।
क्रियते वलितो स स्यान्मुग्धस्त्रीव्रीडिते स्मृतम् ॥ ३१
॥ इति वलितोरु ॥ ४ ॥

*

मण्डलं स्थानकं कृत्वा चतुरस्रौ करौ ततः ।
विदध्याद्विच्यवां चारीमूर्ध्वमण्डलितौ करौ ॥ ३२
उद्वेष्टितेन कृत्वा तौ विदध्यात् स्वस्तिकाकृती ।
मण्डलस्वस्तिकं तत् स्यात् प्रसिद्धार्थावलोकने ॥ ३३
॥ इति मण्डलस्वस्तिकम् ॥ ५ ॥

*

---

1 ABC वक्षौ ।

वक्षःस्थितौ करौ कृत्वा रेचितौ चतुरस्रितौ ।
आभुग्ने वक्षसि पुनर्यत्र व्यावर्तितेन तौ ॥ ३४
आनीय स्वस्तिकीभूतौ स्वस्तिकौ चरणौ तथा ॥ ३५
अंसयुग्ममनाभुग्नं तद्वक्षःस्वस्तिकं मतम् ।
लज्जानुतापयोस्तज्ज्ञैर्विनियोगोऽस्य कीर्तितः ॥ ३६

॥ इति वक्षःस्वस्तिकम् ॥ ६ ॥

*

उद्वेष्टितेन निष्क्रम्य पाणी व्यावर्तिताश्रितौ ।
सममुत्प्लुत्य कुरुते कराङ्घ्रिस्वस्तिकं यदा ॥ ३७
तदा स्वस्तिकमाख्यातं परान्वेषणभाषणे ।
तथा निषेधराभस्ये क्वचिद्युद्धपरिक्रमे ॥ ३८

॥ इति स्वस्तिकम् ॥ ७ ॥

*

वक्षःक्षेत्रे करौ कृत्वा व्यावर्तनमधोर्ध्वगौ ।
पार्श्वयोश्च ततः क्षिप्त्वा द्रुतभ्रममधोमुखम् ॥ ३९
हंसपक्षं करं चान्यं वक्ष आनीय तादृशम् ।
निष्क्रामयेत्ततः सूचीपादौ यत्र प्रयोजितौ ॥ ४०
आक्षिप्तरेचितं तत् स्यादनेनाभिनयेत् सुधीः ।
परिग्रहस्याचरितं तथा त्यागपरम्परा ॥ ४१

॥ इत्याक्षिप्तरेचितम् ॥ ८ ॥

*

उद्वेष्टनक्रियां कृत्वा विक्षिप्येते करौ यदा ।
चारीं विधायापक्रान्तां रच्यमानेऽपवेष्टने ॥ ४२
कृत्वान्यचरणं सूचीं यत्राङ्घ्रिकरसंभवम् ।
स्वस्तिकं रचयेत् तत् स्यात् पृष्ठस्वस्तिकसंज्ञकम् ।
विनियोगे स्वस्तिकोक्ते नियोज्यं नृत्यकोविदैः ॥ ४३

॥ इति पृष्ठस्वस्तिकम् ॥ ९ ॥

*

करिहस्तो दक्षिणः स्यादितरः खटकामुखः ।
पादौ हृत्स्वस्तिकौ यत्र तदर्धस्वस्तिकं भवेत् ॥ ४४
केचित् करिकरस्थाने पक्षवञ्चितकं जगुः ।
कटिस्थमर्धचन्द्रं च पक्षप्रद्योतकं न वा ॥ ४५

॥ इत्यर्धस्वस्तिकम् ॥ १० ॥

*

कराङ्घ्रिरचितो यत्र स्वस्तिको त्रुटिताङ्कः ।
अग्रतः पृष्ठतः पार्श्वे तद् दिक्स्वस्तिकमुच्यते ॥ ४६
स्याद्गीतपरिवर्त्तेऽस्य विनियोगः प्रकीर्तितः ।
स्वस्तिकोत्त्यन्तरेषु स्यात् स्वस्ति[क]प्रक्रिया त्वियम् ॥ ४७

॥ इति दिक्स्वस्तिकम् ॥ ११ ॥

*

आविद्धां रचयन् चारीं पादमश्चितमाचरेत् ।
करौ क्रमाद्रचितौ स्तो यत्रोन्मत्तं तु तद्भवेत् ।
सौभाग्यादिसमुद्भूते गर्वे विद्वद्भिरीरितम् ॥ ४८

॥ इत्युन्मत्तम् ॥ १२ ॥

*

लताहस्तौ समनखौ चरणौ संयुतौ मिथः ।
देहः स्वाभाविकः प्राक् प्रवेशे समनखं तु तत् ॥ ४९

॥ इति समनखम् ॥ १३ ॥

*

चतुरस्रं समास्थाय हस्तौ तु चतुरस्रितौ ।
व्यावर्त्य दक्षिणं हस्तं मुहुर्निष्काशयन् भजेत् ॥ ५०
आक्षिप्तमथ तं हस्तं शुकतुण्डाकृतिं नयन् ।
पातयेद्दक्षिणस्योरोरुपर्यत्रापरः करः ॥ ५१
वामे दक्षस्थितो यत्र खटकामुखसंज्ञकः ।
अपविद्धं तदेव स्यात् कोपासूयार्थदर्शने ॥ ५२

॥ इत्यपविद्धम् ॥ १४ ॥

*

नासादेशं गतो यत्र व्यावर्तपरिवर्तनम् ।
कृत्वा धत्तेऽलपद्मत्वं करिहस्तस्तदाश्चितम् ।
स्वस्यातिकौतुकाद्योज्यं सम्मुखप्रेक्षणे हि तत् ॥ ५३

॥ इत्यश्चितम् ॥ १५ ॥

*

विधाय चतुरस्रः सन् हंसपक्षौ द्रुतभ्रमौ ।
शीर्षादूर्ध्वमधो नीत्वा व्यावर्तपरिवर्तितैः ॥ ५४
आविद्धवक्रौ तावेव वक्षसि स्वस्तिकीकृतौ ।
कट्यां नीत्वा ततः पक्षप्रद्योतकविधानतः ॥ ५५
चारीं तद्वशगां कृत्वा बहित्थं स्थानकं ततः ।

कुर्यात्तदा प्रविज्ञेयं बुधैः स्वस्तिकरेचितम् ।
नृत्ताभिनयने तच्च प्रहर्षादौ नियोजितम् ॥ ५६

॥ इति स्वस्तिकरेचितम् ॥ १६ ॥

*

मण्डलं स्थानकं कृत्वा चतुरस्रं समाश्रितः ।
स्कन्धशीर्षे करं नीत्वा दक्षमुद्वेष्टनाश्रितम् ॥ ५७
पतन्तेत्पतनाविष्टकनिष्ठाद्यङ्गुलित्रयम् ।
अलपद्मीकृत्य तथोद्धट्टितेऽङ्घ्रौ च दक्षिणे ॥ ५८
आविद्धवक्रतां नीते चतुरस्रीकृते ततः ।
अनेनैव यथा वामपार्ष्ण्यङ्घ्री यत्र तद्विदा ॥ ५९
क्रियते तत्र विज्ञेयं करणं तु निकुट्टितम् ।
आत्मसंभावनाख्यानपरे वाक्ये प्रकीर्तितम् ॥ ६०

॥ इति निकुट्टम् ॥ १७ ॥

*

तदेवार्धनिकुट्टं स्यादेकेनाङ्गेन निर्मितम् ।
तत्रैवार्था(? र्थे) नियुज्येताप(? प्र)रूढवचनोक्तिके ॥ ६१

॥ इत्यर्धनिकुट्टम् ॥ १८ ॥

*

विधाय भ्रमरीं पार्श्वे मण्डलस्थानमाश्रितः ।
छिन्नां कटीं विधायैकां बाहुशीर्षे च पल्लवम् ॥ ६२
करं कृत्वाङ्गान्तरेण यत्रैवं क्रियते पुनः ।
एवं त्रिचतुरावृत्त्या कटीछिन्नं तु विस्मये ॥ ६३

॥ इति कटीछिन्नम् ॥ १९ ॥

*

वैष्णवस्थानके स्थित्वा चारीमाक्षिप्तिकां चरन् ।
अपक्रान्तां ततः कृत्वा स्वस्तिकं च करद्वये ॥ ६४
दक्षिणो नाभिदेशस्थः खटकामुखसंज्ञकः ।
अर्धचन्द्रस्तथा कट्यां कृतं पार्श्वं च सन्नतम् ॥ ६५
अन्यदुद्वाहितं यत्रावृत्तयोगान्तरैस्तथा ।
तत् कटीसममादिष्टं जर्जरस्याभिमन्त्रणे ॥ ६६

॥ इति कटीसमम् ॥ २० ॥

*

व्यावर्त्यते करो यस्तु तत्पक्षेऽङ्घ्रिं बहिः क्षिपेत् ।
अन्यस्तु चतुरस्रः स्यात् पूर्वोऽथ परिवर्त्यते ॥ ६७

हस्त आक्षिप्यते चाङ्घ्रिरेवमेवाङ्ककं पुनः ।
अपरं क्रियते यत्र विक्षिप्ताक्षिप्तिकं तु तत् ॥ ६८
विनियोज्यं गतौ चैतदागतौ च विचक्षणैः ।
प्राधान्याच्चरणस्येदं न तथा मन्वते परे ॥ ६९
यतो वाक्यार्थधीर्हस्ताभिनयस्यानुसारिणी ।
प्राधान्यतो हस्तकानां नृत्यमात्रपरं त्विदम् ॥ ७०
अन्यदङ्गमतस्तालानुसंधाने चिकीर्षतः ।
अन्तरालानुसंधाने गतीनां च परिक्रमे ।
योज्यं करणमेतादृगिति तद्भेदिनां मतम् ॥ ७१

॥ इति विक्षिप्ताक्षिप्तिकम् ॥ २१ ॥

*

भुजङ्गत्रासितां चारीं विधायाक्षिप्य कुञ्चितम् ।
अङ्घ्रिं विधायोरुकटीजानु त्र्यस्रं विवर्तयेत् ॥ ७२
एकदोलाकरं कृत्वा तथान्यं खटकामुखम् ।
व्यावृत्तिपरिवृत्तिभ्यां भुजङ्गत्रासितं तु तत् ॥ ७३

॥ इति भुजङ्गत्रासितम् ॥ २२ ॥

*

नितम्बश्चतुरस्रो वा करोऽलाता च चारिका ।
दक्षिणाङ्गे तथा वामे तूर्ध्वजानुस्तथैव चेत् ।
अङ्गान्तरं तदालातं ललिते नृत्त ईरितम् ॥ ७४

॥ इत्यलातम्[1] ॥ २३ ॥

*

वृश्चिकं चरणं कृत्वा तत्पक्षस्थं करं पुनः ।
अरालं शीर्ष आधाय वेगान्नासाप्रदेशतः ॥ ७५
कृतो वक्षस्यरालोऽन्यस्तद्विख्यातं निकुञ्चितम् ।
योज्यमुत्पतनौन्मुख्ये वितर्कादौ च सूरिभिः ।
एके पताकसूच्यास्यावपि नासाग्रगौ जगुः ॥ ७६

॥ इति निकुञ्चितम् ॥ २४ ॥

*

---

1 After अलातम् ॥ २३ ॥ ABC give the following description of विक्षिप्त which has its proper place after अतिक्रान्तम् ॥ ६५ ॥ The meaning of the verses is the same but readings differ: विद्युद्भ्रान्तां दण्डपादां क्रमाच्चार्यौ विधाय चेत् । उद्वेष्टितं तदा चापवेष्टितं करयोः क्रमात् ॥ एकमार्गयोः कृत्वा रेचयेदग्रपृष्ठयोः । पार्श्वयोर्विक्षेपे तौ हि विक्षिप्तं तु तदा भवेत् । अभिनेयस्तथैतेन वीरोद्धतपरिक्रमः ॥

पार्श्वक्षेत्राक्राम्यमाणे ऊर्ध्वं व्यावर्तनेन तु ।
परिवर्तनतोऽधश्च करे चरणयोः पुनः ॥ ७७
जङ्घास्वस्तिकतः पश्चादपक्रान्तां विहाय च ।
तद्दिक्स्थे चरणे वामः करो दोलाभिधो यदा ।
करणं घूर्णितं प्रोक्तं तदा नृत्यविशारदैः ॥ ७८

॥ इति घूर्णितम् ॥ २५ ॥

*

मण्डलं स्थानकं कृत्वा हृदिस्थं खटकामुखम् ।
सूचीमुखं चापसार्य यदा तस्यान्तिके नयेत् ॥ ७९
उद्धट्टितोऽङ्घ्रिपार्श्वे च सततं त्वपसारणे ।
तदोर्ध्वरेचितं प्रोक्तमसमञ्जसचेष्टने ॥ ८०

॥ इत्यर्धरेचितम् ॥ २६ ॥

*

चरणं कुञ्चितं कृत्वोर्ध्वजानुं चारिकां यदा ।
कृत्वा तद्दिग्भवं हस्तमलपद्मं विधाय वा ॥ ८१
अरालं चोर्ध्ववदनं पक्षे वञ्चितकं तथा ।
कृत्वा जानु स्तनक्षेत्रे नीत्वा हस्तस्तथापरः ।
खटकाख्यस्तदेवोर्ध्वजानुसंज्ञं प्रजायते ॥ ८२

॥ इत्यूर्ध्वजानु ॥ २७ ॥

*

रेचितो यत्र वामः स्यात् करः कव्यामथेतरः ।
पादावुपेतापसृतौ तदा करणमीरितम् ।
अर्धमत्तल्लिसंज्ञं च नियुक्तं तरुणे मदे ॥ ८३

॥ इत्यर्धमत्तल्लि ॥ २८ ॥

*

रेचितो दक्षिणो हस्तः पादः सव्यो निकुट्टितः ।
दोला चैव भवेद्वामस्तद्रेचकनिकुट्टितम् ॥ ८४

॥ इति रेचकनिकुट्टितम् ॥ २९ ॥

*

गुल्फौ च स्वस्तिकीकृत्य पादौ यत्रापसर्पयेत् ।
करयोर्युगपद्यत्रोद्वेष्टनं चापवेष्टनम् ।
एवं मुहुर्मुहुर्यत्र तन्मत्तल्लि मदे स्मृतम् ॥ ८५

॥ इति मत्तल्लि ॥ ३० ॥

*

नितम्बकेशहस्तादिवर्तना दक्षिणे परे।
बद्धोऽन्यः करिहस्तः स्यात् पादश्चोद्धट्टितस्तथा।
अङ्गान्तरं चेल्ललितं नृत्ये स्यातां विलासिनि॥ ८६

॥ इति ललितम्॥ ३१॥

*

सूचीमुखकरे देहक्षेत्राद्दूरेऽपसर्पति।
सूचीपादेऽप्यपसृते चारी चेद्भ्रमरी भवेत्।
क्रमादङ्गान्तरेऽप्येवं वलिते वलितं मतम्॥ ८७

॥ इति वलितम्॥ ३२॥

*

ऊर्ध्वजानुर्यदा चारी करौ चैव लताभिधौ।
इच्छयैकं तयोर्न्यस्येदुपर्यूर्ध्वस्य जानुनः।
अङ्गान्तरे पुनश्चैवं दण्डपक्षे प्रकीर्तितम्॥ ८८

॥ इति दण्डपक्षम्॥ ३३॥

*

चारीं च भ्रमरीं कृत्वा ततो नूपुरपाटिकाम्।
एकेनैव तु पादेन रेचयेत्तद्गतं करम्।
द्वितीयं चेल्लताहस्तं तदा नूपुरमादिशेत्॥ ८९

॥ इति नूपुरम्॥ ३४॥

*

खटकास्यौ नाभिदेशे हस्तौ स्यातां पराङ्मुखौ।
सूचीपादोऽन्येन युक्त्वा चार्यापक्रान्तया युतः।
तथैव स्यात् परः पादस्तदा पादापविद्धकम्॥ ९०

॥ इति पादा[प]विद्धम्॥ ३५॥

*

भुजङ्गत्रासितां चारीं कृत्वा हस्तौ च रेचयेत्।
वामपार्श्वे तु तत् ख्यातं भुजङ्गत्रस्तरे[1]चितम्॥ ९१

॥ इति भुजङ्गत्रस्तरेचितम्॥ ३६॥

*

भुजङ्गत्रासिता चारी दक्षेऽङ्घ्रौ दक्षिणः करः।
रेचितो[2]स्याल्लताहस्तो भुजङ्गाञ्चितकं भवेत्॥ ९२

॥ इति भुजङ्गाञ्चितम्॥ ३७॥

*

---

1 ABC रेचिरम्। 2 ABC स्योलता°।

वैशाखं स्थानकं छिन्ना कटी यत्र क्रमात् करौ ।
अलपद्मौ कटीपार्श्वे तच्छिन्नं करणं भवेत् ॥ ९३

॥ इति छिन्नम् ॥ ३८ ॥

*

समयाक्षिप्तिका चारी करश्चोद्वेष्टितो भवेत् ।
वलितं च त्रिकं कृत्वा पादयोः स्वस्तिकं तथा ॥ ९४
कुर्यात्तद्वद् द्वितीयान्तं (?ङ्गं) करौ साकं तथोल्वणौ ।
करणं भ्रमरं नाम तद्वद्गत(? तच्चोद्धत) परिक्रमे ॥ ९५

॥ इति भ्रमरम् ॥ ३९ ॥

*

दण्डपक्षौ करौ कुर्याद्दण्डपादां विधाय च ।
चारीं प्रमोदनृत्ये स्यात् करणं दण्डरेचितम् ।
केचित् प्रयोगमप्याहुरस्योद्धतपरिक्रमे ॥ ९६

॥ इति दण्डरेचितम ॥ ४० ॥

*

पाणी वक्षःस्थितौ तत्र वामश्चेदलपल्लवः ।
चतुरो दक्षिणोऽङ्घ्रिस्तूद्धट्टितश्चतुरं भवेत् ।
अनेनाभिनयेत् सूचीं विस्मये कञ्चुकिस्थिताम् ॥ ९७

॥ इति चतुरम् ॥ ४१ ॥

*

विधाय वामे सूचीं च द्रुतापसरणान्विताम् ।
तत्पार्श्वे दक्षिणं न्यस्य कटिरेचितमाचरेत् ॥ ९८
अथवा भ्रमरीं कुर्वन् व्यावृत्तपरिवर्तितौ ।
करौ कृत्वा चातुरस्र्यं नर्तको विदधाति चेत् ॥ ९९
कटिभ्रान्तं तदा ज्ञेयं यतीनां परिपूरणे ।
तालान्तरालगानां तु तथा गतिपरिक्रमे ।
नियोगः प्रोच्यते सद्भिः कटिभ्रान्तविधानगः ॥ १००

॥ इति कटिभ्रान्तम् ॥ ४२ ॥

*

उद्वेष्टितविधानेनाधो यात्येकः परस्परः ।
ऊर्ध्वं यायाद्विप्रकीर्णौ तादृगावृत्तिपेशलौ ॥ १०१
उत्तानरेचितश्चैको वक्षःक्षेत्रगतस्ततः ।
परोऽधोमुखगो यत्र रेचितः स्थानकं गतः (? ततः) ।
आलीढं व्यंसितं योज्यं महाकपिपरिक्रमे ॥ १०२

॥ इति व्यंसितम् ॥ ४३ ॥

*

अतिक्रान्तागतं पादं पात्यमानं तु कुञ्चयेत् ।
तदैव हस्तं व्यावर्त्य ततो निष्क्रामयेदथ ॥ १०३
आक्षिप्य परिवर्त्तेन कुर्यात्तं खटकामुखम् ।
वक्षःक्षेत्रे त्वेवमेव कुर्यादङ्गं द्वितीयकम् ।
इति क्रान्तमिदं ज्ञेयमुद्धतस्य परिक्रमे ॥ १०४

॥ इति क्रान्तम् ॥ ४४ ॥

*

वैशाखं स्थानकं हस्तौ पादौ ग्रीवा(?वां) कटीमपि ।
रेचयेद्यत्र तद् ज्ञेयं तज्ज्ञैर्वैशाखरेचितम् ॥ १०५

॥ इति वैशाखरेचितम् ॥ ४५ ॥

*

पाणी च स्वस्तिकीकृत्य तयोरेकस्तदूर्ध्वतः ।
मुखपार्श्वनिकुट्टः स्यादन्योऽधोवदनो भवेत् ॥ १०६
निकुट्टितस्तद्वदेव पादो यत्र भवेदिदम् ।
तत् प्रकाशनसञ्चाराभ्यासे पार्श्वनिकुट्टितम् ॥ १०७

॥ इति पार्श्वनिकुट्टितम् ॥ ४६ ॥

*

यत्राड्डितां विधायाथो दोलायां चक्रवद्भ्रमेत् ।
गात्रमन्तर्गते कृत्वा तत् प्रोक्तं चक्रमण्डलम् ।
सुरपूजाविधौ कार्यं तथोद्धतपरिक्रमे ॥ १०८

॥ इति चक्रमण्डलम् ॥ ४७ ॥

*

हस्तौ करिकरौ यत्र पृष्ठे वृश्चिकपुच्छवत् ।
पादः समुन्नतं पृष्ठं दूरे तद्वृश्चिकं विदुः ।
व्योमगैरावणादीनां विमाने विनियुज्यते ॥ १०९

॥ इति वृश्चिकम् ॥ ४८ ॥

*

वामो लताकरो यत्र चरणो यत्र वृश्चिकः ।
तल्लतावृश्चिकं नाम गगनोत्पतने स्मृतम् ॥ ११०

॥ इति लतावृश्चिकम् ॥ ४९ ॥

*

चरणं वृश्चिकं कृत्वा बाहुशीर्षेऽलपद्मकौ ।
क्रमाद्यदा निकुट्येते तदा वृश्चिककुट्टितम् ॥ १११

॥ इति वृश्चिककुट्टितम् ॥ ५० ॥

*

विधायाक्षिप्तिकां चारीं क्षिप्यते खटकामुखः ।
चतुरो वा तदाक्षिप्तं विदूषकपरिक्रमे ॥ ११२

॥ इत्याक्षिप्तम् ॥ ५१ ॥

*

वामस्याङ्केः कनिष्ठायाः समीपे स्यात् प्रसारितः ।
तदैव स्तब्धबाहुः सन् वामः स्यादलपल्लवः ॥ ११३
वामेतरः करः किञ्चित् प्रसृताग्रोऽर्गलं तथा ।
परिक्रमेऽङ्गदादीनां विनियोगोऽस्य कीर्तितः ॥ ११४

॥ इत्यर्गलम् ॥ ५२ ॥

*

चरणो वृश्चिको यत्र स्वस्तिकौ रेचितौ करौ ।
विच्युतौ च तदाकाशयाने वृश्चिकरेचितम् ॥ ११५

॥ इति वृश्चिकरेचितम् ॥ ५३ ॥

*

बद्धामथ स्थितावर्तां चार्यौ कृत्वा करौ यदि ।
उरोमण्डलिनौ कुर्यात्तदुरोमण्डलं मतम् ॥ ११६

॥ इत्युरोमण्डलम् ॥ ५४ ॥

*

चारी चाषगतिर्यत्र दोलाख्यौ च यदा करौ ।
उद्वेष्टितौ ततश्चापवेष्टितौ च क्रमाद्यदा ।
तदावर्तं भवेदेतत् साध्वसादपसर्पणे ॥ ११७

॥ इत्यावर्तम् ॥ ५५ ॥

*

ऊर्ध्वाङ्गुलितलः पाद ऊर्ध्वपार्श्वे प्रसारितः ।
तदग्रपृष्ठतः कार्यमेवमङ्गान्तरेऽपि चेत् ।
सूत्रधारगतावेतदुक्तं तलविलासितम् ॥ ११८

॥ इति तलविलासितम् ॥ ५६ ॥

*

वृश्चिकाङ्घ्रिर्यदाङ्गुष्ठो ललाटे तिलकं लिखेत् ।
तदा ललाटतिलकं विद्याधरगतौ स्मृतम् ॥ ११९

॥ इति ललाटतिलकम् ॥ ५७ ॥

*

ऊर्ध्वजानुं विधायाथ दोलापादां यदाचरेत् ।
दोलापादौ करौ यत्र दोलापादं [1]तदेरितम् ॥ १२०

॥ इति दोलापादम् ॥ ५८ ॥

*

---

1 BC यदेरितम् ।

वामपार्श्वेऽलपद्मः स्यादुत्तानो दक्षिणः करः ।
यदा तत् कुञ्चितं पादे सव्येऽग्रतलसंचरे ।
आनन्दनिर्भरसुरानन्दाभिनयने मतम् ॥ १२१

॥ इति कुञ्चितम् ॥ ५९ ॥

*

पादमाक्षिप्तचारीकमाक्षिप्याक्षिप्य हस्तकौ ।
व्यावृत्तिपरिवृत्तिभ्यां ततो भ्रमरिकाविधौ ।
रेचितौ चेत् करौ स्यातां विवृत्तमुद्धते गमे ॥ १२२

॥ इति विवृत्तम् ॥ ६० ॥

*

पार्ष्णिस्वस्तिकयुक्त्याऽदः सूचीपादेन जायते ।
निवर्तते विवृत्याथ प्रत्यावृत्याथ पार्श्वतः ॥ १२३
त्रिकं स्याद्विनतं चारी बद्धा पाणी द्रुतभ्रमौ ।
यत्र तद्विनिवृत्तं स्यात्तदुद्धतपरिक्रमे ॥ १२४

॥ इति विनिवृत्तम् ॥ ६१ ॥

*

पार्श्वाक्रान्ताह्वचार्यां वै कुर्यात् पादानुगौ करौ ।
पार्श्वक्रान्तं तदा यद्वाभिनेयवशगौ करौ ।
परिक्रमेऽतिरौद्रस्य भीमसेनादिकस्य तत् ॥ १२५

॥ इति पार्श्वक्रान्तम् ॥ ६२ ॥

*

एकस्याङ्घ्रेः पार्ष्णिभागे समुन्नततरः परम् ।
कुञ्चितश्चेद् द्वितीयः स्यात् खटकाख्यस्य मध्यमा ॥ १२६
वक्राङ्गुली तिलकयेल्ललाटं तन्निशुम्भितम् ।
अथवा हस्तकोऽत्र स्याद्वृश्चिकोऽत्र महेश्वरः ।
अभिनेय इति प्राहुर्नृत्यशास्त्रविशारदाः ॥ १२७

॥ इति निशुम्भितम् ॥ ६३ ॥

*

चतुर्दिक्कं शिरःक्षेत्रे पृष्ठतो भ्रामितं द्रुतम् ।
भ्रामयेच्चरणं चेत् स्यात् विद्युद्भ्रान्तं तदाद्भुतम् ।
एतदप्यौद्धते प्रोक्तं नृत्यविद्भिः परिक्रमे ॥ १२८

॥ इति विद्युद्भ्रान्तम् ॥ ६४ ॥

*

अतिक्रान्ताख्यचारीकमङ्घ्रिमग्रे प्रसारयेत् ।
चेत् प्रयोगानुगौ हस्तावतिक्रान्तं तदोच्यते ॥ १२९

॥ इत्यतिक्रान्तम्[1] ॥ ६५ ॥

*

---

1 ABC इत्यभिक्रान्तम् ।

विद्युद्भ्रान्तां दण्डपादां चारीं कृत्वा क्रमादिह ।
उद्वेष्टितौ तथा चापवेष्टितौ रेचयेत् करौ ॥ १३०
एकमार्गगतावग्रे पृष्ठतः पादयोः क्षिपेत् ।
विक्षिप्तमभिनेयः स्यात्तेनोद्धतपरिक्रमः ॥ १३१
॥ इति विक्षिप्तम् ॥ ६६ ॥

*

आक्षिप्य हस्तचरणं त्रिकं यत्र विवर्तयेत् ।
करं च रेचयेदन्यं तद्वदन्ति विवर्तितम् ॥ १३२
॥ इति विवर्तितम् ॥ ६७ ॥

*

दोलापादाख्यचार्यां चेत् कर्णे स्यात् करिहस्तकः ।
क्रियापरः करो यत्र गजक्रीडनकं तदा ॥ १३३
॥ इति गजक्रीडनकम् ॥ ६८ ॥

*

वक्षःस्थः कटकः पादः सूचीपार्श्वे ततं यदा ।
गण्डक्षेत्रे यदा वामो हस्तः स्यादलपल्लवः ॥ १३४
सूचीपादोऽथ वा सूचीमुखो वा नृत्यहस्तकः ।
गण्डसूची तदा प्रोक्त[ा] कपोलालङ्कृतौ भवेत् ॥ १३५
॥ इति गण्डसूची ॥ ६९ ॥

*

वृश्चिकोऽङ्घ्रिर्यदा हस्तौ लतारेचितकावुरः ।
समुन्नतं तदान्वर्थं करणं गरुडप्लुतम् ॥ १३६
॥ इति गरुडप्लुतम् ॥ ७० ॥

*

चार्यातिक्रान्तया यद्वा दण्डपादाख्यया द्रुतम् ।
उत्क्षिप्य पात्यमानेऽङ्घ्रौ सशब्दं तालिकां करौ ।
कुरुतो यत्र तत् प्रोक्तं तलसंस्फोटितं बुधैः ॥ १३७
॥ इति तलसंस्फोटितम् ॥ ७१ ॥

*

समस्याङ्घ्रेरूरुपृष्ठे निहितः चरणः परः ।
वक्षःस्थलो मुष्टिहस्तः स्यादर्धचन्द्रः कटीतटे ।
करणं पार्श्वजानुः स्यात् प्रोक्तं युद्धनियुद्धयोः ॥ १३८
॥ इति पार्श्वजानुः ॥ ७२ ॥

*

भूमिश्लिष्टलताहस्ताङ्गुष्ठावङ्घ्रिस्तु पृष्ठतः ।
प्रसृतश्चेन्महापक्षिबुद्धौ (? युद्धे) गृध्रावलीनकम् ॥ १३९

॥ इति गृध्रावलीनकम् ॥ ७३ ॥

*

कट्यां यदार्धचन्द्रः स्यात् पक्षवञ्चितकोऽथवा ।
वक्षःस्थः खटकाहस्त परपार्ष्णिस्थितोऽपरः ।
सूचीपादस्तदा सूचीविद्धं सूच्यादिषु स्मृतम् ॥ १४०

॥ इति सूचीविद्धम् ॥ ७४ ॥

*

कुञ्चितं पादमुत्क्षिप्य स्थापयेद्भूमिमस्पृशन् ।
तद्दिक्कः खटको हस्तो वक्षसि स्यात्तथा परः ॥ १४१
शिरःक्षेत्रेऽलपद्मश्च तथैवाङ्गान्तरं क्रमात् ।
करणं सूचिसंज्ञं तद्गदितं विस्मये विदा ॥ १४२

॥ इति सूचि ॥ ७५ ॥

*

तदैवांकांग(? वैकाङ्ग)रचितमर्धसूचीति सूचितम् ॥ १४३

॥ इत्यर्धसूची ॥ ७६ ॥

*

करौ खटकदोलाख्यौ चारी च हरिणप्लुता ।
हरिणप्लुतमेतत् स्याद्धरिणस्य प्लुते गते ॥ १४४

॥ इति हरिणप्लुतम् ॥ ७७ ॥

*

बद्धा चारी तथा हस्तादूर्ध्वमण्डलसंज्ञितौ ।
अङ्घ्रिः सूची विवृत्तं च त्रिकं भ्रमरिकाश्रितम् ।
करणं परिवृत्तं तत् कीर्तितं नृत्यपण्डितैः ॥ १४५

॥ इति परिवृत्तम् ॥ ७८ ॥

*

दण्डपादां द्रुतं चारीं कृत्वा नूपुरपादिकाम् ।
दण्डवद्यत्र हस्तः स्याद्दण्डपादं तदुच्यते ॥ १४६

॥ इति दण्डपादम् ॥ ७९ ॥

*

रेचयित्वा करावूर्वोर्वृश्चिकाङ्घ्रिं निकुञ्च्य च ।
भ्रमरीं क्रियते चेत्स्यात्मयूरललितं तदा ॥ १४७

॥ इति मयूरललितम् ॥ ८० ॥

*

दोलापादं विधायान्येनाङ्घ्रिणा चेत् करोत्ययम् ।
उत्प्लुत्य भ्रमरीं तूर्णं भवेत् प्रेङ्खोलितं तदा ॥ १४८

॥ इति प्रेङ्खोलितम् ॥ ८१ ॥

*

मृगप्लुतां विधायाङ्घ्रिः स्वस्तिकोऽग्रे विरच्यते ।
हस्तौ स्तो[1] दोलौ संनतं तदधमस्य गतौ मतम् ॥ १४९

॥ इति सन्नतम् ॥ ८२ ॥

*

एकतश्चरणावङ्गीव(? ङ्घ्राव)श्चितेऽपसरत्यथ ।
शिरः स्यान्नामितं तस्य पार्श्वे स्यादुचितं (? तः) करः ॥ १५०
एवमङ्गान्तरं यत्र तत्सर्पितमुदाहृतम् ।
नियोज्यमेतन्मत्तस्योन्मत्तस्य परिसर्पणे ॥ १५१

॥ इति सर्पितम् ॥ ८३ ॥

*

वक्षस्युद्वेष्टितो वामः करः स्यात् खटकामुखः ।
त्रिपातकः करः कर्णे पादश्चेदञ्चितः कृतः ।
अग्रे प्रसार्यते यत्र करिहस्तमिदं विदुः ॥ १५२

॥ इति करिहस्तम् ॥ ८४ ॥

*

रेचिताद्धस्ततो पादस्तद्दिको हस्तघर्षणात् ।
गच्छेत् पादान्तरान्मन्दमन्दमन्यो लताकरः ।
तदा प्रसर्पितं ज्ञेयं व्योमयानगतौ मतम् ॥ १५३

॥ इति प्रसर्पितम् ॥ ८५ ॥

*

कृत्वा बद्धामपक्रान्तां चारीं च करयोः पुनः ।
तत्तत् प्रयोगानुगयोरपक्रान्तं प्रकीर्तितम् ॥ १५४

॥ इत्यपक्रान्तम् ॥ ८६ ॥

*

पताकौ चेदधोवक्त्राङ्गुलीकौ शिरसः स्थलम् ।
परिवृत्त्या समानीय निष्काम्योर्ध्वांसयोर्द्वयोः ॥ १५५
अन्योऽन्याभिमुखौ कृत्वा स्वदेहाभिमुखाङ्गुली ।
नितम्बाख्यौ[2] विधीयेते नितम्बं तु तदा मतम् ॥ १५६

॥ इति नितम्बम् ॥ ८७ ॥

*

---

1 ABC स्तौ । 2 ABC °ख्यौर्विधीयते ।

दोलापादस्य गमनागमने हंसपक्षकः ।
अन्वेत्यङ्गान्तरं यत्र स्खलितं तत् प्रकीर्तितम् ॥ १५७

॥ इति स्खलितम् ॥ ८८ ॥

*

अलातां चारिकां कृत्वा न्यस्येदङ्घ्रिं द्रुतं पुरः ।
चपेटवत् कृतो हस्तस्तथान्याङ्गविधानतः ।
सिंहविक्रीडितं नाम भवेद्रौद्रगताविदम् ॥ १५८

॥ इति सिंहविक्रीडितम् ॥ ८९ ॥

*

पद्मकोशौ[वोर्णनाभौ][1]करावङ्घ्रिस्तु वृश्चिकः ।
प्राञ्चौ भङ्क्त्वापरे पादे [1]वृश्चिके तादृशौ पुनः ।
कृतौ सिंहाकर्षितकं सिंहाभिनयने मतम् ॥ १५९

॥ इति सिंहाकर्षितम् ॥ ९० ॥

*

जनितं चरणं कृत्वा ह्यरालं चालपल्लवम् ।
ललाटे हृत्प्रदेशे च हस्तावभिमुखाङ्गुली ॥ १६०
क्रमादुद्वेष्टितेन स्तो व्यावृत्त्या पार्श्वगौ ततः ।
परिवृत्त्यापवेष्टेन वक्षोदेशे च तादृशौ ॥ १६१
मिथोऽभिमुखतां प्राप्तौ निधीयेते यदा तदा ।
अवहित्थं बुधैः प्रोक्तं विनियोगोऽस्य कथ्यते ।
गोपनप्रायवाक्यार्थे केचिदन्ये प्रचक्षते ॥ १६२

॥ इत्यवहित्थम् ॥ ९१ ॥

*

मण्डलस्थानके स्थित्वा निर्भुग्ने हृदये यदा ।
विन्यस्तौ खटकावक्रौ निवेशं[2] गजवाहने ॥ १६३

॥ इति निवेशम् ॥ ९२ ॥

*

एलकाक्रीडितौ पादौ हस्तौ खटकदोलकौ ।
वलितं सन्नतं गात्रमेलकाक्रीडितं तदा ।
अभिनेतव्यमेतेनाधमप्राणिप्रसर्पितम् ॥ १६४

॥ इत्येलकाक्रीडितम् ॥ ९३ ॥

*

1 cf वृश्चिकोऽङ्घ्रिः पद्मकोशौ वोर्णनाभौ यदा करौ । सं. र. अ. श्लो. ७१८.

2 ABC निशेवं ।

प्रसार्य पुनरानीतौ हस्तौ पादौ यदा पुनः ।
गात्रमुद्वृत्तचारीकमुद्वृतं तत् प्रकीर्तितम् ॥ १६५
॥ इत्युद्वृत्तम् ॥ ९४ ॥

*

चारीं च जनितां कृत्वा करं कुर्याल्लताभिधम् ।
अन्यं वक्षःस्थितं मुष्टिकरणं जनितं तदा ।
क्रियारम्भोऽभिनेतव्य एतेन महतां नृणाम् ॥ १६६
॥ इति जनितम् ॥ ९५ ॥

*

करौ संघट्टिततलौ रचयित्वा पताककौ ।
दोलापादां भजेचारीं वैष्णवस्थानके स्थितः ॥ १६७
दक्षिणं कटिदेशस्थं वामं रेचितमाचरेत् ।
तलसंघट्टितं तत् स्यादनुकम्पार्थगोचरम् ॥ १६८
॥ इति तलसंघट्टितम् ॥ ९६ ॥

*

आकाशाभिमुखो यत्र कुञ्चितश्चरणो व्रजेत् ।
रेचितौ च करौ विष्णुक्रान्तं स्यात् क्रमणे हरेः ॥ १६९
॥ इति विष्णुक्रान्तम् ॥ ९७ ॥

*

विधाय चारीमाक्षिप्तां वामतस्तदनन्तरम् ।
हस्तं विधाय व्यावृत्तं परिवर्तनकारकम् ॥ १७०
अरालतां नयेदेनं नते दक्षिणपार्श्वके ।
एतच्चापसृतं ज्ञेयं विनयेनो(? ना)पसर्पणे ॥ १७१
॥ इत्यपसृतम् ॥ ९८ ॥

*

वैष्णवे स्थानके पाणिरेको वक्षसि रेचितः ।
अन्योऽलपल्लवः शीर्षं लोलितं पार्श्वयोर्द्वयोः ।
विश्राम्यति यदा प्राहुर्लोलितं करणं तदा ॥ १७२
॥ इति लोलितम् ॥ ९९ ॥

*

क्रमेण स्वस्तिकौ पादौ तथैवापसृतौ शिरः ।
परिवाहितमानीतौ दोलौ हस्तौ यदा तदा ।
मदस्खलितकं प्राहुः प्रयोज्यं मध्यमे प(?म)दे ॥ १७३
॥ इति मदस्खलितम् ॥ १०० ॥

*

हस्तरेचितकं कुर्वन् कुर्याच्चारीमलातिकाम् ।
कुञ्चितौ च करौ कृत्वा व्यावर्तनविधानतः ॥ १७४
कृत्वालपद्मौ न्यस्येते करौ चेद्बाहुशीर्षयोः ।
वृषभक्रीडितं प्राहुस्तदा करणमुत्तमम् ॥ १७५
॥ इति वृषभक्रीडितम् ॥ १०१ ॥

*

चार्यामाविद्धसंज्ञायां व्यावृत्तपरिवर्तितम्[1] ।
अलपद्मं करं न्यस्येदूरूपृष्ठे यदा तदा ।
ससंभ्रमगतौ योज्यं सभ्रान्तं करणं भवेत् ॥ १७६
॥ इति संभ्रान्तम्[2] ॥ १०२ ॥

*

चारीं संघट्टितां कृत्वा पार्श्वे तत्संनतिं नयेत् ।
करौ समुद्यतौ कर्तुं तालिकां च यदा तदा ।
उद्धट्टितं प्रयोक्तव्यं नृत्ये तज्ज्ञैः प्रमोदकैः ॥ १७७
॥ इत्युद्धट्टितम् ॥ १०३ ॥

*

सूचीमुखो नृत्यहस्तो दक्षिणश्चेदपेत्य च ।
उपव्रजेत् करं वामं सोऽङ्घ्रिर्वामो निकुट्टकः ॥ १७८
एवमङ्गान्तरेऽपि स्यात् सूच्यङ्घ्रिर्दक्षिणः करः ।
दक्षिणोऽप्यलपद्मः स्यात् वामहस्तोऽपि पूर्ववत् ।
एवं पुनः पुनर्यत्र विष्कुम्भं तत् प्रकीर्तितम् ॥ १७९
॥ इति विष्कुम्भम् ॥ १०४ ॥

*

चारी तु शकटास्या स्यादेको हस्तः प्रसारितः ।
अङ्घ्रिणा सह हस्तोऽन्यो वक्षःस्थः खटकामुखः ।
यत्रैतत् शकटास्यं स्यात् प्रयोज्यं बालखेलने[3] ॥ १८०
॥ इति शकटास्यम् ॥ १०५ ॥

*

अरालखटकौ हस्तौ यत्र व्यावर्तनान्वितौ ।
सहोरूद्वृत्तया चार्या निदध्यादूरुपृष्ठयोः ।
ऊरूद्वृत्तं प्रेमकोपप्रार्थनेर्ष्यासु कीर्तितम् ॥ १८१
॥ इति ऊरुद्वृत्तम् ॥ १०६ ॥

*

---

1 ABC परिवृत्तितम् । 2 ABC repeat ससंभ्रमगतौ योज्यं from the Sambhrānta karaṇa. 3 ABC खेदने ।

हस्तौ रेचयेच्छीर्षं परिवाहितमाचरेत् ।
स्वस्तिकापसृतौ[1] कुर्यात् पादौ नागापसर्पिते ।
प्रयोज्यमेतदिच्छन्ति प्रायेण तरुणे मदे ॥ १८२

॥ इति नागापसर्पितम् ॥ १०७ ॥

*

अङ्गावुत्क्षिप्यमाणेऽपि तथा निक्षिप्यमाणके ।
त्रिपताकौ भजेतां चेदनु प्रोन्नतिसंनताम् ॥ १८३
तद्वदेव शिरश्चेत् स्याद्गङ्गावतरणं तदा ।
गङ्गावतारे निर्दिष्टं मुनिना सर्वदर्शिना ॥ १८४

॥ इति गङ्गावतरणम् ॥ १०८ ॥

*

प्रायो वक्षःस्थितः कार्यो वा[2]मस्तु करणे करः ।
दक्षिणस्तु करस्तत्तत्करणस्यानुगः स्मृतः ॥ १८५
तलपुष्पपुटस्यादौ प्रयोगाद् ज्ञायते किल ।
पुष्पैः स्याद्देवतापूजामङ्गलार्थतयेति च ॥ १८६
गङ्गावतरणस्यान्ते कीर्तनान्मङ्गलान्तता ।
सर्वकार्येषु विज्ञेयेत्यवदद्भरतो मुनिः ॥ १८७

॥ इत्यष्टोत्तरशतं करणानि ॥ १०९ ॥

*

श्रीमत् कुम्भलमेरावर्बुदशिखरे च चित्रकूटे च ।
दुर्गवरौ वरपदवी यत्करणं राजते जगति ॥ १८८

इति श्रीराजाधिराजश्रीकुम्भकर्णमहीमहेन्द्रेण विरचिते सङ्गीतराजे षोडशसाहस्र्यां सङ्गीतमीमांसायां नृत्यरत्नकोशे करणोल्लासे शुद्धकरणाभिधानं प्रथमं परीक्षणं [समाप्तम् ।]

तृतीयोल्लासे द्वितीयं परीक्षणम् ।

[मङ्गलम् ।]

यमन्तःकरणेष्वाद्या नित्यामारोप्य तन्वतः ।
विचिन्तयन्ति तं वन्दे करणातीतमीश्वरम् ॥ १

*

अथ देशीपूर्वकाणि बृहद्देशीविदांवरः ।
करणानि समाचष्टे कुम्भकर्णो धराधिपः ॥ २
अश्वितं चैकक(?च)रणाश्वितं स्याद्भैरवाश्वितम् ।
दण्डप्रणामाश्वितं च कर्तर्यश्वितमेव च ॥ ३

---

1 AC °स्तिकोप° । 2 ABC याम° ।

तिर्यगञ्चितकं तद्वत् समपादाञ्चितं तथा ।
भ्रान्तपादाञ्चितं च[1] करणं स्यात्ततः परम् ॥ ४
अलगं कूर्मालगं चोर्ध्वालगं चान्तरालगम् ।
लोहडीं च तथा चान्यैकपादलोहडी तथा ॥ ५
कर्तरी लोहडी चैव स्यादपसरणं तथा ।
जलादिशयनं नागबन्धं कपालचूर्णनम् ॥ ६
नतपृष्ठं तथा मत्स्यकरणं च प्रकीर्तितम् ।
करस्पर्शनसंज्ञं च तथैवैणप्लुतं मतम् ॥ ७
तिर्यक्करणसंज्ञं च तिर्यक्स्वस्तिकमेव च ।
स्कन्धभ्रान्तं खण्डसूचि समसूचि ततः परम् ॥ ८
ततो विषमसूचीति बाह्यभ्रमरिका ततः ।
अन्तर्भ्रमरिका चैव छत्रभ्रमरिका तथा ॥ ९
तिरिपभ्रमरी चाथ लगभ्रमरिकेति च ।
चक्रभ्रमरिका नामोचितभ्रमरिका तथा ॥ १०
शिरोभ्रमरिका चैव तथा दिग्भ्रमरीति च ।
एवमुत्प्लुतिपूर्वाणि षट्त्रिंशत्संमितानि च ।
करणानि समासेन लक्षिष्यन्ते यथागमम् ॥ ११

*

स्थित्वा वै समपादेनोत्तानश्चेदुत्प्लुतेन्नटः ।
तदाञ्चितं स्यात् करणम् ।

॥ इत्यञ्चितम् ॥ १ ॥

*

एकपादाञ्चितं तथा ॥ १२
यद्येतदेकपादेन निर्मितम् ।

॥ इत्येकक(?च)रणाञ्चितम् ॥ २ ॥

भैरवाञ्चितम् ॥

*

भैरवाञ्चितमूरुपृष्ठे स्थितैकाङ्घ्रिरुत्प्लुतौ ॥ १३

॥ इति भैरवाञ्चितम् ॥ ३ ॥

*

यदाञ्चितवदुत्प्लुत्य निपतेद्भुवि[2] दण्डवत् ।
दण्डप्रणामाञ्चितकं वदति नृत्यकोविदः ॥ १४

॥ इति दण्डप्रणामाञ्चितकम् ॥ ४ ॥

*

---

1 AB चैव करणं । 2 ABC निपतेद्भुवि । यदाञ्चितवदुत्प्लुत्य दण्डवन्नृत्यकोविदः । दण्डप्रणामाञ्चितकं ।

कर्त्तर्यञ्चितमेव च ।
चरणाभ्यां स्वस्तिकाभ्यामञ्चिते परिकीर्तितम् ॥ १५

॥ इति कर्तर्यञ्चितम् ॥ ५ ॥

*

समपादात् परं तिर्यगुत्प्लुतौ तिर्यगञ्चितम् ॥ १६

॥ इति तिर्यगञ्चितम् ॥ ६ ॥

*

विधाय पादावूर्ध्वाग्रौ समौ स्कन्धेन भूतलम् ।
आक्रम्योल्लालयेत्पादौ परिवर्तनमाचरेत् ।
तिर्यग्यत्र क्रमादेतत् समपादाञ्चितं विदुः ॥ १७

॥ इति समपादाञ्चितम् ॥ ७ ॥

*

दक्षिणाङ्घ्रिं भ्रामयित्वा तदीयतलपृष्ठतः ।
वामाङ्घ्रिजङ्घामध्यं चेदवष्टभ्याञ्चितं ततः ॥ १८
कृत्वा धरित्रीं स्कन्धाभ्यामधिष्ठाय विवर्तनम् ।
विधायोल्लालयेत्पादौ भ्रान्तपादाञ्चितं तदा ॥ १९

॥ इति भ्रान्तपादाञ्चितम् ॥ ८ ॥

*

उत्प्लुत्याधोमुखोऽग्रे च पतित्वा कुक्कुटासनम् ।
यत्र बध्नाति तत्प्रोक्तमलगं करणोत्तमम् ॥ २०

॥ इत्यलगम् ॥ ९ ॥

*

यदि स्यादलगे कूर्मासनं कूर्मालगं तदा ॥ २१

॥ इति कूर्मालगम् ॥ १० ॥

*

समाङ्घ्रेरूर्ध्वसंस्थाने पतित्वोर्ध्वालगं भवेत् ॥ २२

॥ इत्यूर्ध्वालगम् ॥ ११ ॥

*

कृत्वालगं निपत्योर्व्यामुत्तानोरःस्थलं स्थितः ।
पृष्ठतः शिरसा श्रोणिं स्पृशेच्चेदन्तरालगम् ॥ २३

॥ इत्यन्तरालगम् ॥ १२ ॥

*

यत्र कृत्वा समौ पादौ विवृत्य त्रिकमुत्प्लुतेत् ।
तिर्यक् तल्लोहडीसंज्ञम् ।

॥ इति लोहडी[1] ॥ १३ ॥

*

लोहडीलुण्ठितं भुवा ॥ २४

---

1 ABC put लोहडी after °भुवा । But लोहडी लुण्ठितं भुवा seems to be a part of the definition of एकपाद लोहडी.

एकपादप्रयुक्तेयमेकपादादिलोहडी ॥ २५

॥ इत्येकपादलोहडी ॥ १४ ॥

*

एकपादलुठितं वा ।
लोहड्येव स्वस्तिकाङ्घ्रिरचिता लोहडी(? कर्तरी)मता ॥ २६

॥ इति कर्त्तरीलोहडी ॥ १५ ॥

*

दर्पसरणं प्रोच्यतेऽधुना ।
वैष्णवं स्थानमास्थाय पृथ्व्यां चेत् पार्श्वतः पतेत् ॥ २७

॥ इति दर्पसरणम् ॥ १६ ॥

*

जलशायिवदेतत् स्यादासने जलशायिकम् ॥ २८

॥ इति जलशयनम् ॥ १७ ॥

*

तदेव नागबन्धं स्यान्नागबन्धवदासने ॥ २९

॥ इति नागबन्धम् ॥ १८ ॥

*

समपादस्थितो भूमौ शीर्ष्णा संस्पृश्य भूतलम् ।
परावृत्तिं वितनुते कपालचूर्णितं हि तत् ॥ ३०

॥ इति कपालचूर्णितम् ॥ १९ ॥

*

कपालचूर्णेन जाते वक्षस्युत्तानिते नते ।
नतपृष्ठं परैरुक्तं वंकोलं करणं त्विदम् ॥ ३१

॥ इति नतपृष्ठम् ॥ २० ॥

*

कृत्वोत्प्लवनमावर्त्य मध्यं पार्श्वेन मत्स्यवत् ।
वामेन परिवर्तेचेत्त(?तत)न्मत्स्यकरणं भवेत् ॥ ३२

॥ इति मत्स्यकरणम् ॥ २१ ॥

*

अलगं विधाय करणं हस्तेनाश्रित्य नर्तकीं भूमिम् ।
परिवर्तेत यदेदं स्पर्शनमुक्तं कराद्यं तत् ॥ ३३

॥ इति करस्पर्शनम् ॥ २२ ॥

*

कृत्वोत्प्लवनं सूचीमन्यतमां खे विधाय चेद्व्रजते ।
भूमावूर्ध्वस्थानं यदोत्कटासनं तदाप्लुतं चैणम् ॥ ३४

॥ इत्येणप्लुतम् ॥ २३ ॥

*

तिरश्चैकेन पादेन समुत्प्लुत्य निपत्य चेत् ।
एकपादेन पृथ्व्यां चेत्तिष्ठेत्तिर्यक्कृतिस्तदा ॥ ३५

॥ इति तिर्यक्करणम् ॥ २४ ॥

*

तिर्यक्स्वस्तिकमुत्प्लुत्य स्यात्तिर्यक्स्वस्तिके कृते ॥ ३६

॥ इति तिर्यक्स्वस्तिकम् ॥ २५ ॥

*

पृथ्व्यां स्थित्वांसयुग्मेन कृत्वा चैवोत्कटासनम् ।
करणं चाश्रितं कृत्वा धृत्वाङ्गान्तरमम्बरे ॥ ३७
बाहुभ्यां भुवमाक्रम्य भ्रामं भ्रामं च पूर्ववत् ।
तिष्ठेत् प्रतिदिशं यत्र तत् स्कन्धभ्रान्तमुच्यते ॥ ३८

॥ इति स्कन्धभ्रान्तम् ॥ २६ ॥

*

सूचीनां त्रितयं प्रोक्तं तद्विधा परिकीर्तितम् ।
भौमाकाशविभेदेन समाद्यन्यतमां यदि ॥ ३९
करणानि दधत्यन्ते सूचीं प्राक्कथितानि तु ।
सूच्यन्तानि तदा तानि जायन्त इति सूरयः[1] ॥ ४०

॥ इति सूच्य[न्त]म् ॥ २७ ॥

*

सव्येतरेण पादेन स्थित्वा सव्याङ्घ्रिकुञ्चनात् ।
सव्यावर्तं भ्रमेद्यत्र सा बाह्यभ्रमरी मता ॥ ४१

॥ इति बाह्यभ्रमरी ॥ २८ ॥

*

अस्या एव विपर्यासादन्तर्भ्रमरिका भवेत् ॥ ४२

॥ इति अन्तर्भ्रमरी ॥ २९ ॥

*

स्थित्वैकेनाङ्घ्रिणा भूमौ दण्डवच्चोत्क्षिपेत् परम् ।
सव्यावर्तं भवेद्यत्र सा छत्रभ्रमरी मता ॥ ४३

॥ इति छत्रभ्रमरी ॥ ३० ॥

*

अङ्घ्रिस्वस्तिकमाधाय तिर्यग्भ्रमणतो भवेत् ॥ ४४

॥ इति तिरिपभ्रमरी ॥ ३१ ॥

*

---

1 Khaṇḍasūci, Viśamasūci and Samasūci-all the three seem to be described here.

वैष्णवं स्थानकं कृत्वा तिष्ठेत् सव्याङ्घ्रिणा ततः ।
देहं भ्रामयतस्तिर्यगलगभ्रमरी भवेत् ॥ ४५

॥ इत्यलगभ्रमरी ॥ ३२ ॥

*

खण्डसूच्या भ्रमाच्चक्रवच्चक्रभ्रमरी भवेत् ॥ ४६

॥ इति चक्रभम्ररी ॥ ३३ ॥

*

देहस्य तिर्यग् भ्रमणात् समपादादनन्तरम् ।
उचितभ्रमरीं नाम ब्रूते शङ्करकिङ्करः ॥ ४७

॥ इति उचितभ्रमरी ॥ ३४ ॥

*

सा शिरोभ्रमरी ज्ञेया शिरसैव भुवि स्थिता ।
पादावूर्ध्वीकृतौ बिभ्रत् त्रिशो भ्रमणतो द्रुतम् ॥ ४८

॥ इति शिरोभ्रमरी ॥ ३५ ॥

*

भ्रामं भ्रामं सकृत् प्राग्वद्यत्र हस्तधृतक्षिति ।
चतुर्दिक्च क्रमात्तिष्ठेत्तदा दिग्भ्रमरी मता ॥ ४९

॥ इति दिग्भ्रमरी ॥ ३६ ॥

*

अन्येऽपि सन्ति भूयांसो भेदाः करणसंश्रयाः ।
स्वयं बुद्धिमतोह्यास्ते न प्रोक्ता विस्तराद्भिया ॥ ५०

उच्चैर्यदीयकरणानि मनोहराणि
तत्तत्स्वदेशललनालपनेषु चित्रम् ।
तेन त्रिलोकपरितोषकराणि राज्ञा
देशप्रसिद्धकरणानि विनिर्मितानि ॥ ५१

इति श्रीराजाधिराजश्रीकुम्भकर्णमहीमहेन्द्रेण विरचिते सङ्गीतराजे षोडशसाहस्र्यां सङ्गीतमीमांसायां नृत्यरत्नकोशे करणोल्लासे देशीकरणनिरूपणं नाम द्वितीयं परीक्षणं समाप्तम् ॥२॥

[आनन्दसञ्जीवनाद् उद्धृतं भ्रमरीविषयकं प्रकरणम् ।]

अथ आनन्दसंजीवनमध्यात्[1]–

चारीहस्तकसङ्घात् करणानि विदुर्बुधाः ।
प्रभवन्ति भिदास्तेषां भेदास्ते रससंमिताः ॥ १

क्वचिच्चारीवशाना(? न्ना)म क्वचिद्धस्तकपूर्वकम् ।
प्रसादे क्रियमाणे स्यात् कर्तव्यं नाट्यपण्डितैः ॥ २

---

1 BC ॥ श्री ॥

यथा गीते सदाभोगः शिखरत्वे निरूपितः ।
तथा नृत्ये च तासां तु नर्तनं कलशोपमम् ॥ ३
आभोगनर्तने प्रोक्ता भ्रमर्यो मुख्यतो बुधैः ।
विशेषाद्भ्रमकादीनां सुप्रभास्ताः प्रकीर्तिताः ॥ ४
भरतोक्ता अपि त्यक्त्वा अल्पाल्पाः करणे स्वके ।
ताभ्यः कियत्यो वक्ष्यन्ते कामसंजीविकास्तु याः ॥ ५

*

पताकं हृदये न्यस्य करेऽन्यस्मिन् प्रसारिते ।
तदेवाङ्गं बहिः क्षिप्त्वा भ्रमणाद् हृदयङ्गमाः ।
भ्रमे यत्र स्मृतोऽभ्याससुहृद्भिस्त्रिःपुरःसरम् ॥ ६

॥ इति हृदयंगमाः ॥ १ ॥

*

बाह्वोः पताकौ संन्यस्य भ्रमणादङ्कमौलिका ।
शिरःपल्लविका चाथ द्वितीया कथ्यतेऽधुना ॥ ७
ललाटे तु पताकः स्या[द्] भवेदन्यः प्रसारितः ।
बाह्वोः प्रसारणं कृत्वा करौ स्यातां द्रुतभ्रमौ ।
नर्तनाच्च शिरोदेशे द्वितीया शीर्षपल्लवा ॥ ८

॥ इति शीर्षपल्लवाद्वयम् ॥ २ ॥

*

एकाङ्घ्रिं कुञ्चितं कृत्वा द्वितीये पार्ष्णितः स्थिते ।
यथोल्लासकरौ तस्यां भ्रमणात् कुञ्चिता मता ॥ ९

॥ इति कुञ्चिता ॥ ३ ॥

*

ताले ताले कुञ्चिता स्यात् तथैवाङ्कस्थिता सती ।
कुञ्चिताया द्रुतस्पर्शा विज्ञेया भूमिपल्लवा ॥ १०

॥ इति भूमिपल्लवा ॥ ४ ॥

*

प्रसार्य बाहुयुगले समे वाङ्घ्रिद्वये स्थिता ।
तत्र वेगभ्रमणतो विज्ञेया चक्रवर्तिनी ॥ ११

॥ इति चक्रवर्तिनी ॥ ५ ॥

*

सकृद्रेचितहस्तश्चेत् त्यक्त्वा स्थानं च संभ्रमात् ।
मण्डला सापि निर्दिष्टा द्विधाऽन्या सा प्रकीर्तिता ॥ १२

लास्ये तु या भुवस्त्यक्तं वस्तु गृह्णातु पण्डितः ।
मुहुर्मुहुः भ्रमी या सा लास्यमण्डलिका तु सा ॥ १३

॥ इति लास्यमण्डलिका ॥ ६ ॥

*

तिर्यक् स्वास्फालनेनैव भ्रमणाल्लम्बहस्तयोः ।
तिर्यग् मण्डलिका नाम द्वितीयेयं प्रकीर्तिता ॥ १४

॥ इति तिर्यग्मण्डलिका ॥ ७ ॥

*

सकृत् पार्ष्णिगता भ्रान्त्वा चक्रवद्वेगिता सती ।
तथैवोपविशेद्भूमौ लयात् सिंहासना मता ॥ १५

॥ इति सिंहासना ॥ ८ ॥

*

भ्रमती मण्डले या सा त्वराभ्रमणसंगता ।
पार्ष्णिजभ्रमरीत्युक्ता मुहुः सा परिमण्डली[1] ॥ १६

॥ इति परिमण्डली ॥ ९ ॥

*

धूनयती करौ स्वीयौ पादयोः कुञ्चिताग्रयोः ।
न्युब्जं तिर्यग् ययोः कुर्याद् मुहुस्तिर्यक्कृते मते ॥ १७

॥ इति न्युब्जकृता ॥ १० ॥

*

स्थित्वा चैकाङ्घ्रिणा चान्यं दण्डवच्च प्रसारयेत् ।
यथा भ्रमति सा तस्माद्विज्ञेया तलदर्शिनी ॥ १८

॥ इति तलदर्शिका ॥ ११ ॥

*

तिर्यक्पताके चोत्ताने त्वन्येनाच्छादिते सति ।
यथा भ्रमर्या[2] भ्रमरी प्रोक्ता मेलापनी बुधैः ॥ १९

॥ इति मेलापनी ॥ १२ ॥

*

बह्वयश्चान्या भवन्त्येताः सव्यजा अपसव्यजाः ।
लास्येनैव समुद्भूता धन्यास्ता अन्यतोऽधमाः ॥ २०
एतद्राज्ञां पुरंध्रीणामुद्दिष्टं यन्मयाधुना ।
नात्र ग्राम्यकृता भावा योज्यास्ते नाट्यकोविदैः ॥ २१
मस्तका भ्रमरी विद्यादथो न्युब्जादिपातनम् ।
अङ्घ्रेर्भूमेश्च यो योगः स च नैसर्गिको मतः ।
अन्याङ्गेन समायोगो न कार्यश्च नरैः सदा ॥ २२

1 BC परीमंडली । 2 ABC repeat भ्रामरी ।

उच्चैर्यदीयकरणानि मनोहराणि
तत्तत्स्वदेशललनालपमे(?ने)षु चित्रम् ।
तेन त्रिनेत्रपरितोषकरेण राज्ञा
देशप्रसिद्धकरणानि विनिर्मितानि ॥ २३

॥ इति भ्रमर्यः ॥ १३ ॥

तृतीयोल्लासे तृतीयं परीक्षणम् ।

*

किमङ्गहारस्तव नागराजः किं नागराजस्य हृतिस्तवाङ्गे ।
इत्थं ह सोक्तो नगराजकन्यया ननर्त देवः सकलाङ्गहारकैः ॥ १

*

[अङ्गहाराः ।]

न व्यग्रैः करणैर्दृष्टमदृष्टं वा प्रसाध्यते ।
अतस्तद्द्वयसंपत्त्यै तत्समूहं ब्रुवेऽधुना ॥ २
यच्छिरःप्रमुखाङ्गानां प्रदेशमुचितं प्रति ।
प्रापणं सविलासं तदङ्गहारोऽभिधीयते ॥ ३
अङ्गप्रयोगयोगेन ये हारा हरनिर्मिताः ।
मध्यस्थपदलोपेन तेऽङ्गहाराः स्मृता बुधैः ॥ ४
[1]औचित्यान्मेलनेऽङ्गानां प्रयोगः क्रमपेशलः ।
करणं कीर्त्यते तज्ज्ञैस्तद्द्वयं मातृकाः स्मृताः ॥ ५
त्रिभिः कलापकस्तैश्च चतुर्भिः खण्डको मतः ।
संघातः पञ्चभिस्तैश्च संज्ञाभेदा इतीरिताः ॥ ६
तत्समूहविशेषश्चाङ्गहारस्तत्परः स्मृतः ।
तिसृभिः पञ्चभिर्वा स्यान्नवभिर्वा यथोदितम् ॥ ७
अङ्गहारो मातृकाभिरेकः स्यान्मुनिनोदनात् ।
करणन्यूनताधिक्यं यत्र नो दूषणाय तत् ॥ ८
मुनिनैव स्वयं सूत्रे विकल्पस्यानुशासनात् ।
परिभाषाङ्गहाराणां मयैवादौ प्रदर्शिता ॥ ९
अथोद्देशपरं लक्ष्म यथाशास्त्रं प्रदर्श्यते ।

---

1 ABC ऊचित्यान्मेलने ।

स्थिरहस्तोऽथ पर्यस्तो भ्रमरश्चापसर्पितः ॥ १०
आक्षिप्तोऽथ परिच्छिन्नस्तथा वैशाखरेचितः ।
पार्श्वस्वस्तिकसंज्ञश्च सूचीविद्धोऽपराजितः ॥ ११
मदाद्विलसिताख्यश्च मत्ताक्रीडस्ततः स्मृतः ।
आलीढश्चाच्छुरितकः पार्श्वच्छेदाभिधस्ततः ॥ १२
विद्युद्भ्रान्त इति प्रोक्ता अङ्गहारास्तु षोडश ।
मानेन चतुरस्रेण मानदानविपश्चिता ॥ १३
विष्कुम्भापसृतो मत्तस्खलितो म(?ग)तिमण्डलः ।
अपविद्धश्च विष्कुम्भोद्धट्टिताक्षिप्तरेचिताः ॥ १४
रेचितोऽर्धनिकुट्टश्च वृष्णि(?श्चि)कापसृतस्ततः ।
अलातकः परावृत्तः परिवृत्तकरेचितः ॥ १५
उद्वृत्तश्चैव संभ्रान्तस्ततः स्वस्तिकरेचितः ।
षोडशैते त्र्यस्रमाना द्वात्रिंशदुभयेऽप्यमी ॥ १६
करणव्रातसंदर्भविशेषश्चाङ्गहारकः ।
इत्युक्ते स्यात्तदानन्त्यं ग्रन्थवैचित्र्यहेतुकम् ॥ १७
प्राधान्यं विनियोगस्य समाश्रित्येयतां कृता ।
गणना गुम्फवैचित्र्यात् स्वयमूह्याः परैप(?रस्प)रैः ॥ १८
लीनं समनखं कृत्वा व्यंसितं च निकुट्टकम् ।
ऊरूद्वृत्तं विधायाथ स्वस्तिकाक्षिप्तके तथा ॥ १९
नितम्बं करिहस्तं च कटीछिन्नमिति क्रमात् ।
दशभिः करणैः प्रोक्तः स्थिरहस्तो महीभृता ।
द्वात्रिंशदङ्गहारेषु ज्ञेयमन्तमवस्थितम् ॥ २०

*

[चतुरस्रमानेनाङ्गहाराः ।]

अनुक्तमपि तत्त्वज्ञैः कटीछिन्नं तु लक्ष्मगम् ।
विधाय लक्ष्म सूत्रस्थं करणद्वन्द्वमादितः ॥ २१
चतुर्दिक्षु ततोऽन्यानि करणानि क्रमेण च ।
नृत्यवैचित्र्यमाधातुमङ्गहारेषु वर्तयेत्[1] ॥ २२

॥ इति स्थिरहस्तः ॥ १ ॥

*

तलपुष्पपुटं तद्वदपविद्धं च वर्तितम् ।
निकुट्टमूरूद्वृत्ताख्यमाक्षिप्तं तदनन्तरम् ॥ २३

1 BC वर्तते ।

उरोमण्डलमास्थाय नितम्बं करिहस्तकम् ।
दशभिः करणैरेभिः कार्यः पर्यस्तकाभिधः ॥ २४

॥ इति पर्यस्तकः ॥ २ ॥

*

नूपुरं च तथाक्षिप्तं छिन्नं सूचीनितम्बकम् ।
करिहस्तं तथा चोरोमण्डलकमतोऽष्टभिः ।
एभिस्तु करणैः प्रोक्तो भ्रमरो भ्रमपेशलः ॥ २५

॥ इति भ्रमरः ॥ ३ ॥

*

अपक्रान्तं व्यंसितस्य केवलं करजाः क्रियाः ।
करिहस्तं चार्धसूचि विक्षिप्तं च ततः परम् ॥ २६
कटीछिन्नं तथा चोरूद्वृत्तमाक्षिप्तकं पुनः ।
करिहस्तमिति प्रोक्तं नवकं करणोद्भवम् ।
अपसर्पितसंज्ञे स्यादङ्गहारे हरप्रिये ॥ २७

॥ इत्यपसर्पितः ॥ ४ ॥

*

नूपुरं चैव विक्षिप्तमलताक्षिप्तके ततः ।
उरोमण्डलकं चैव नितम्बं करिहस्तकम् ॥ २८
करणैरष्टभिः प्रोक्तो बुधैराक्षिप्तिकोऽत्र च ।
विक्षिप्तालातकाक्षिप्तान्यत्र केचिद् द्विरभ्यधुः ॥ २९

॥ इत्याक्षिप्तिकः ॥ ५ ॥

*

कृत्वा समनखं छिन्नं संभ्रान्तं दक्षिणाङ्गतः ।
वामतो भ्रमरे चार्धसूच्यतिक्रान्तमेव च ॥ ३०
भुजङ्गत्रासितं पश्चात् करिहस्तं क्रमादिति ।
नवभिः करणैः प्रोक्तः परिच्छिन्नोऽङ्गहारकः ॥ ३१

॥ इति परिच्छिन्नः ॥ ६ ॥

*

अङ्गद्वयेन वैशाखरेचितं चाथ नूपुरम् ।
भुजङ्गत्रासितोन्मत्ते मण्डलस्वस्तिके ततः ॥ ३२
निकुट्टमूरूद्वृत्तं चाक्षिप्तोरोमण्डले तथा ।
करिहस्तं क्रमादेतैरेकादशभिरुच्यते ।
वैशाखरेचितो नाम विशाखे[1] पितृसेविना ॥ ३३

॥ इति वि(?वै)शाखा(?ख)रेचितः ॥ ७ ॥

*

---

1 The reading may be विशाखेऽपि नृसेदिना । The meaning in both the cases is not clear.

दिक्स्वस्तिकं विधायैकेनाङ्गेनार्धनिकुट्टकम् ।
पुनर्दिक्स्वस्तिकं कृत्वाऽन्याङ्गेनार्धनिकुट्टकम् ॥ ३४
अपविद्धमूरूद्वृत्तं चाक्षिप्तं च नितम्बकम् ।
करिहस्तमिति प्रोक्तो दशभिः करणैरयम् ।
पार्श्वस्वस्तिकसंज्ञोऽयमङ्गहारो हरार्चने ॥ ३५

॥ इति पार्श्वस्वस्तिकः ॥ ८ ॥

*

अर्धसूच्यथ विक्षिप्तमावर्तं च निकुट्टकम् ।
अथोरूद्वृत्तमाक्षिप्तमुरोमण्डलकं ततः ।
करिहस्ते तथा सूचीविद्धोऽभून्नवभिः स्फुटः ॥ ३६

॥ इति सूचीविद्धः ॥ ९ ॥

*

अपराजितसंज्ञे स्याद् दण्डपादं ततः परम् ।
व्यंसितं प्रसर्पितं च निकुट्टार्धनिकुट्टके ॥ ३७
आक्षिप्तोरोमण्डले च करिहस्तमितीरितैः ।
नवभिर्लक्षणं प्रोक्तं मुनभिर्भरतादिभिः ॥ ३८

॥ इत्यपराजितः ॥ १० ॥

*

बहुशश्चित्रगुम्फानि मदस्खलितकं तथा ।
मतल्लिकरणं चैव तलसंस्फोटितं तथा ॥ ३९
कृत्वैतानि निकुट्टं चोरूद्वृत्तं करिहस्तकम् ।
आद्यत्रिकद्विरभ्यासादस्मिन् तानि तथा दश ॥ ४०
चतुःपञ्चादिकान् केचित् त्रिकेऽभ्यासान् विदुर्बुधाः ।
मदाद्विलसिते तच्च लक्षणस्थं मयोदितम् ॥ ४१

॥ इति मदविलसितः ॥ ११ ॥

*

दक्षिणाङ्गेन रचयेद् भ्रमरं नूपुरं तथा ।
भुजङ्गत्रासितं चैव ततो वाम(?मे)न चैव हि ॥ ४२
वैशाखरेचिताक्षिप्तच्छिन्नानि भ्रमरं तथा ।
उरोमण्डलसंज्ञं च नितम्बं करिहस्तकम् ।
एकादशभिरेव स्यान्मत्ताक्रीडोऽङ्गहारकः ॥ ४३

॥ इति मत्ताक्रीडः ॥ १२ ॥

*

वामतो व्यंसितं कुर्यान्निकुट्टं चतुरं ततः ।

द्वि[ः] कृत्वालातकाक्षिप्ते उरोमण्डलकं तथा ।
अष्टभिः करणैरत्रालीढः सकरिहस्तकैः ॥ ४४
॥ इत्यालीढः ॥ १३ ॥

*

नूपुरं भ्रमरं कृत्वा व्यंसितालातके तथा ।
नितम्बसूचिसंज्ञं वाच्छुरिते कर(?रि)हस्तकम् ।
अष्टभिः करणैरस्मिन् लक्ष्म प्रोक्तं मनीषिभिः ॥ ४५
॥ इत्याच्छुरितः ॥ १४ ॥

*

पार्श्वच्छेदे च करणं कुर्याद्वृश्चिककुट्टितम् ।
ऊर्ध्वजानु तथाक्षिप्तं स्वस्तिकं च ततः परम् ॥ ४६
परिवर्त्य त्रिकं चोरोमण्डलं च नितम्बकम् ।
